# Kailasachaturdvarasthalingabhidhanam 4

# કૈલાસચતુર્દ્વારસ્થલિઙ્ગાભિધાનમ્ ૪

## Document Information

Text title : Kailasachaturdvarasthalingabhidhanam 4

File name : kailAsachaturdvArasthalingAbhidhAnam4.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 43 - kailAsottaradvArasthaliNgAbhidhAnam | 2-55||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસચતુર્દ્વારસ્થલિઙ્ગાભિધાનમ્ ૪

(કૈલાસોત્તરદ્વારસ્થલિઙ્ગાભિધાનસ્તોત્રમ્ ૪)

ઈશ્વરઃ -

તદપિ શ‍ૃણુ ભક્ત્યા ત્વં સુમનસ્કા સદામ્બિકે ।
લિઙ્ગસઙ્ઘં સુપુણ્યાનાં મુકુટં પશ્ય પાર્વતિ ॥ ૨॥

વામદેવેશ્વરો દેવિ ગિરિકેશસ્સુકેશ્વરઃ ।
બૃહસ્પતીશ્વરશ્ચૈવ વર્ધનેશઃ પિકેશ્વરઃ ॥ ૩॥

કોકિલેશઃ પિચણ્ડેશો વામકર્ણેશ્વરસ્તથા ।
આનન્દેશઃ કર્મરેશશ્ચામરેશઃ પતીશ્વરઃ ॥ ૪॥

વૈરાગ્યેશઃ કલ્પકેશો હરિબ્રહ્મેશ્વરસ્તથા ।
ગણેશસ્ત્રિગુણેશશ્ચ બ્રહ્માણ્ડેશશ્શઠેશ્વરઃ ॥ ૫॥

વિલાસેશસ્સુકેશેશશ્ચામકેશઃ પ્લવેશ્વરઃ ।
અન્નકોશેશ્વરશ્ચૈવ પ્રાણકોશેશ્વરસ્તથા ॥ ૬॥

વિજ્ઞાનેશોઽઘનાશેશશ્ચાત્મેશોરક્ષકેશ્વરઃ ।
આહનન્યેશ્વરશ્ચૈવ મુગ્ધેશઃ કોટિકેશ્વરઃ ॥ ૭॥

નિસર્પીશો નામનેશશ્ચામ્રેશઃ કમઠેશ્વરઃ ।
શનાશનેશ્વરશ્ચૈવ ચોરુગાયેશ્વરસ્તથા ॥ ૮॥

કપિઞ્જલેશ્વરશ્ચૈવ કર્કેશષ્ષણ્ડકેશ્વરઃ ।
અસઙ્ગેશશ્ચ સઙ્ગેશો જ્યોતીશઃ કારણેશ્વરઃ ॥ ૯॥

હરિરુદ્રેશ્વરશ્ચૈવ કૃપાણેશો નિમીશ્વરઃ ।
કનકાવર્તકેશશ્ચ હરીશો ભારુણેશ્વરઃ ॥ ૧૦॥

આમ્રેશ્વરો (અભ્રેશ્વરો) દભ્રકેશો દન્દશૂકેશ્વરસ્તથા ।
ઉદારેશેન્દુમૌલીશૌ મખેશશ્ચ સભેશ્વરઃ ॥ ૧૧॥

હરિકેશઃ કિશોરેશઃ કુદ્દાલેશોઽર્ભકેશ્વરઃ ।
યુવેશ્વરશ્ચ વૃદ્ધેશો દર્દુરેશો બ્રસીશ્વરઃ ॥ ૧૨॥

મતીશ્વરો વનસ્થેશો ગ્રહસ્થેશોઽરિજેશ્વરઃ ।
સહસ્રેશશ્શતેશશ્ચ લક્ષેશઃ કોટિકેશ્વરઃ ॥ ૧૩॥

ચાષેશ્વરો ભાનુકેશો દન્દિરાવર્તિકેશ્વરઃ ।
કસ્તૂરીશો મદન્તીશો મનસ્વીશોઽર્બુદેશ્વરઃ ॥ ૧૪॥

ઐરાવતેશ્વરશ્ચૈવ તઞ્જેશો લિન્દુકેશ્વરઃ ।
અહઙ્કારેશ્વશ્ચૈવ ભાલનેત્રેશ્વરસ્તથા ॥ ૧૫॥

તથૈવૈલબિલેશશ્ચ કૃકેશશ્ચરકેશ્વરઃ (ક્રકેશો) ।
પદ્માસનેશ્વરશ્ચૈવ વારેશસ્તરગેશ્વરઃ ॥ ૧૬॥

વટમૂલેશ્વરશ્ચૈવ ત્રસન્નેશો લુતીશ્વરઃ ।
નકુલેશોઽથ વંશેશઃ પદ્મનેત્રેશ્વરસ્તથા ॥ ૧૭॥

ઉપશાન્તેશ્વરશ્ચૈવ દમેશો વ્રતકેશ્વરઃ ।
ઉલૂકેશોઽથ રુણ્ડેશઃ કાલેશઃ કમલેશ્વરઃ ॥ ૧૮॥

ભગન્ધરેશ્વરશ્ચૈવ ભદ્રેશો ભરણીશ્વરઃ ।
અશ્વિનીશો રોહિણીશઃ પઙ્કજેશોઽવટેશ્વરઃ ॥ ૧૯॥

નિધનેશસ્તથોર્ધ્વેશો ભસ્મેશશ્ચ સમેશ્વરઃ ।
ભવેશશ્ચૈવ સર્વેશો વેદેશશ્શાશ્વતેશ્વરઃ ॥ ૨૦॥

જ્વાલેશ્વરસ્સાલકેશસ્તમાલેશઃ પુણ્યકેશ્વરઃ ।
ઉપધ્યેશોઽણિમાણ્ડેશસ્સર્વરક્તેશ્વરસ્તથા ॥ ૨૧॥

શુનઃપર્ણેશ્વરશ્ચૈવ માદનેશઃ પ્રથેશ્વરઃ ।
શિપિવિષ્ટેશ્વરશ્ચૈવ અંશેશોઽથ મૃગેશ્વરઃ ॥ ૨૨॥

ગજાનનેશ્વરશ્ચૈવ બાણેશો વીરકેશ્વરઃ ।
ચણ્ડેશ્વરશ્ચ મુણ્ડેશશ્ચક્રેશઃ ફણિકેશ્વરઃ ॥ ૨૩॥

અનસૂયેશ્વરશ્ચૈવ ગન્ધમાદેશ ઈશ્વરઃ ।
ભણ્ડેશ્વરઃ પ્રજઙ્ઘેશઃ કાલકણ્ઠેશ્વરસ્તથા ॥ ૨૪॥

મૃત્યુઞ્જયેશશ્શૈલેશસ્સારસેશોઽગતીશ્વરઃ ।
સ્વપ્નેશો જાગ્રતીશશ્ચ સુષુમીશોઽહનીશ્વરઃ ॥ ૨૫॥

શિતિકણ્ઠેશ્વરશ્ચૈવ સૂર્યેશઃ કાન્તિકેશ્વરઃ ।
સ્ફટિકેશશ્ચ રુદ્રેશો વરદેશોઽનૃણીશ્વરઃ ॥ ૨૬॥

શાર્દૂલેશો રભસ્યેશઃ પુણ્ડ્રેશો નટનેશ્વરઃ ।
રુદ્રાક્ષેશઃ કવીન્દ્રેશઃ કવચેશો મણીશ્વરઃ ॥ ૨૭॥

પિલિપ્પિલેશ્વરશ્ચૈવ આમર્દેશો દ્રુણેશ્વરઃ ।
પિતામહેશ્વરશ્ચૈવ કુટિલેશો ઝષેશ્વરઃ ॥ ૨૮॥

ભરતેશઃ કેસરીશશ્ચક્ષુશ્શ્રોત્રેશ્વરસ્તથા ।
દણ્ડકેશશ્ચ લઙ્કેશો મણિભદ્રેશ્વરસ્તથા ॥ ૨૯॥

ઘટોત્કચેશ્વરશ્ચૈવ પુરેશોઽથ નટેશ્વરઃ ।
કરમર્દેશ્વરશ્ચૈવ તથૈવામ્રાતકેશ્વરઃ ॥ ૩૦॥

ફણિભૂષેશ્વરશ્ચૈવ રત્નભૂતેશ્વરસ્તથા ।
વિડાલકેશ્વરશ્ચૈવ અણીશો મહતીશ્વરઃ ॥ ૩૧॥

પૂરુષેશોપરમ્ભેશૌ ગિરીશો રમણીશ્વરઃ ।
કવઙ્ગેશઃ કરીન્દ્રેશો માઘેશો વાષ્કલેશ્વરઃ ॥ ૩૨॥

મહાનાદેશ્વરશ્ચૈવ મણ્ડપેશો બલીશ્વરઃ ।
જરિતેશઃ (રજતેશઃ) કૂર્મકેશશ્ચતુર્ભદ્રેશ્વરસ્તથા ॥ ૩૩॥

પુષ્પરાગેશ્વરશ્ચૈવ ગોમેદેશો લવેશ્વરઃ ।
તૃતીશ્વરઃ ક્ષપેશશ્ચ પ્રસાદેશઃ કુલેશ્વરઃ ॥ ૩૪॥

વજ્રેશ્વરઃ ક્ષેત્રકેશઃ કર્ણિકારેશ્વરસ્તથા ।
કરવીરેશ્વરશ્ચૈવ પુણ્ડરીકેશ્વરસ્તથા ॥ ૩૫॥

વીણાપાણીશ્વર શ્ચૈવ તન્ત્રીશો નાગકેશ્વરઃ ।
હાહાહૂહીશ્વરશ્ચૈવ પયોદેશઃ ક્રથેશ્વરઃ ॥ ૩૬॥

ગુડસારેશ્વરશ્ચૈવ શ્વેતદાનપ્રદેશ્વરઃ ।
પ્રદાનેશશ્શિલાદેશઃ કન્દેશઃ પદદેશ્વરઃ ॥ ૩૭॥

ત્રિલોચનેશો ભાક્લેશસ્સ્થૂલકર્ણેશ્વરસ્તથા ।
પ્રકટેશો ધારકેશઃ કોશાતીતેશ્વરસ્તથા ॥ ૩૮॥

યન્ત્રેશ્વરશ્ચ મન્ત્રેશસ્તથા કનખલેશ્વરઃ ।

ગર્ગરેશઃ પ્રતાપેશ આતાર્યેશઃ કુણીશ્વરઃ ॥ ૩૯॥

ભગીરથેશ્વરશ્ચૈવ દિલીપેશઃ કૃતીશ્વરઃ ।
અનાદીશો મન્ત્રવિદેશ્વરો ગુણહરેશ્વરઃ ॥ ૪૦॥

શઙ્ગેશ્વરઃ પિશઙ્ગેશઃ પાર્યેશસ્તારણેશ્વરઃ ।
કકારેશો માતૃકેશઃ કુષ્ટહારીશ્વરસ્તથા ॥ ૪૧॥

હારીતેશસ્તથાક્ષેશો બકદાલ્ભ્યેશ્વરસ્તથા ।
લોપામુદ્રેશ્વરશ્ચૈવ સુરાભાણ્ડેશ્વરસ્તથા (કુમ્ભજન્મેશ્વરસ્તથા) ॥ ૪૨॥

મણિહસ્તીશ્વરશ્ચૈવ તથા ચિત્રધ્વજેશ્વરઃ ।
રત્નધ્વજેશ્વરશ્ચૈવ કામેશો રુદ્રાણીશ્વરઃ ॥ ૪૩॥

અવન્તીશઃ કર્પટીશો ધ્વજેશશ્છત્રકેશ્વરઃ ।
દેવકન્યેશ્વરચૈવ નાગકન્યેશ્વરસ્તથા ॥ ૪૪॥

સત્યેશ્વરસ્સુનાથેશઃ કુબેરેશો વનેશ્વરઃ ।
પવિત્રેશો વલક્ષેશો મહોક્ષેશો નગેશ્વરઃ ॥ ૪૫॥

સુધેશો વિબુધેશશ્ચ ફુલ્લશૌલાલિકેશ્વરઃ ।
શયનેશો ધાવતેશસ્સમાસીનેશ્વરસ્તથા ॥ ૪૬॥

સર્વકામસમૃદ્ધીશસ્સચ્ચિદેશસ્સુખેશ્વરઃ ।
પ્રણતાર્તિહરેશશ્ચ પઞ્ચગવ્યે(ગઙ્ગે)શ્વરસ્તથા ॥ ૪૭॥

પદ્મનાભેશ્વરશ્ચૈવ પઞ્ચવક્ત્રેશ્વરસ્તથા ।
પઞ્ચાક્ષરેશઞ્ચન્દેશસ્સુદેશઃ કૌશિકેશ્વરઃ ॥ ૪૮॥

આદર્શેશઃ કાલકેશઃ કાલાવર્તેશ્વરસ્તથા ।
તામ્રધ્વજેશ્વરશ્ચૈવ તથા હંસધ્વજેશ્વરઃ ॥ ૪૯॥

વૃષધ્વજેશ્વરશ્ચૈવ તથા સિહ્મધ્વજેશ્વરઃ ।
પિચ્છેશ્વરઃ કુમારેશો નિષઙ્ગેશઃ કુલીશ્વરઃ ॥ ૫૦॥

ઈશાનેશો વિકર્તેશસ્સુરભીશોઽણુકેશ્વરઃ ।
સારઙ્ગેશઃ ખઙ્ગકેશો બન્ધુરેશો ગમેશ્વરઃ ॥ ૫૧॥

શચીશ્વરો સાધુરેશસ્તથા રુદ્રગણેશ્વરઃ ॥

- -

(ફલમ્)

ઈશ્વરઃ -

એતત્તેદિવ્યલિઙ્ગાનાં નામાનિ કથિતાન્યુમે ।
યેદં પ્રાતરુત્થાય પૂજયેત પઠેતવૈ ॥ ૫૨॥

સકૈલાસસ્થલિઙ્ગાનાં પૂજાફલમવાપ્નુયાત્ ।
લિઙ્ગાધ્યાયમિમં પુણ્યં પઠન્રુદ્રગણો ભવેત્ ॥ ૫૩॥

સહસ્રં કથિતં તેષુ તેષૂત્કૃષ્ટતમં શિવે ।
અનન્તાન્યપિલિઙ્ગાનિ કોટીશઃ કમલાનને ॥ ૫૪॥

સારભૂતાનિ લિઙ્ગાનિ કથિતાનિ તવામ્બિકે ।
સન્તિ કૈલાસશિખરે મયાતૂક્તાનિ પાર્વતિ ॥ ૫૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસચતુર્દ્વારસ્થલિઙ્ગાભિધાનમ્ -
૪ - કૈલાસોત્તરદ્વારસ્થલિઙ્ગાભિધાનસ્તોત્રમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૪૩ - કૈલાસોત્તરદ્વારસ્થલિઙ્ગાભિધાનમ્ । ૨-૫૫॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 43 - kailAsottaradvArasthalingAbhidhAnam . 2-55..

Notes:
Īśvara ઈશ્વર lists the names of the several Śivaliṅga-s શિવલિઙ્ગ around Kailāsa કૈલાસ in the Four Cardinal direction - among which are the Śivaliṅga-s શિવલિઙ્ગ at the Northern Gate. He mentions to Devī દેવી; at the conclusion of the list of the Northen Gate, the merits of worshipping and reciting the names of all of the four groups of Śivaliṅga-s શિવલિઙ્ગ.

Encoded and proofread by Ruma Dewan

---

*Kailasachaturdvarasthalingabhidhanam 4*
pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*